**संस्कृतवार्ता:**

**दिनाङ्क :-07.01.2025**

**प्रात: - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्री-अमेरिकीसुरक्षापरामर्शदः**

**अमेरिकीराष्ट्रीयसुरक्षापरामर्शदः जेकसुलिवन इत्येषः ह्यः नवदिल्ल्यां प्रधानमन्त्रिणा नरेन्द्रमोदिना सह मेलनं कृतवान्। उभौ विगतेषु चतुर्षु वर्षेषु भारत-अमेरिका-देशयोः व्यापकवैश्विकरणनीतिकसहभागितायां महत्त्वपूर्णप्रगतेः मूल्याङ्कनं कृतवन्तौ, तेषु प्रौद्योगिकी, रक्षा, अन्तरिक्ष, असैन्यपरमाणु स्वच्छोर्जा, अर्धचालकाः, एआइ इत्येतानि प्रमुखक्षेत्रानि आसन्। श्रीमोदी द्वयोः देशयोः जनानां हिताय वैश्विकहिताय च द्वयोः लोकतन्त्रयोः मध्ये निकटसहकार्यं निरन्तरं गभीरं कर्तुं स्वस्य प्रतिबद्धतां प्रकटितवान्।**

**गृहमन्त्री-भारतपोलः**

**गृहमन्त्री अमितशाहः अद्य नवदिल्ल्यां केन्द्रीय अन्वेषण विभा गेन विकसितस्य भारतपोलपोर्टल इत्यस्य शुभारम्भं करिष्यति। भारतपोल-पोर्टल् इति इण्टरपोल् इत्यनेन सह अन्ताराष्ट्रीयसहायतायाः सर्वे षां अनुरोधानाम् प्रसंस्करणानि सुव्यवस्थितानि करिष्यति। यत्र रक्तवार्णिकीसूचनाः अन्येषां च रङ्गसङ्केतितानां इण्टरपोल्-सूचनानां निर्गमनं च समाविष्टम् अस्ति। एकस्मिन् समाजिकान्तर्जालीय सन्देशे गृहमन्त्री श्रीशाहः अवदत् यत्, एषः महत्त्वपूर्ण-दिवसः भविष्यति यतः सीबीआई इत्यनेन विकसितं भारतपोल् पोर्टल् इत्यस्य आरम्भः भविष्यति।**

## विदेशमंत्रालय-अफगानिस्तान

भारतेन पाकिस्तान देशेन कृत अफगानिस्तानदेशस्य नागरिकानां उपरि विमानप्रहारस्य निन्दा कृता। विदेशमन्त्रालयस्य प्रवक्ता रणधीरजायसवालः एकस्मिन् वक्तव्ये अवदत् यत् भारतेन अफगानिस्तानस्य नागरिकानामुपरि विमानप्रहारस्य विषये ध्यानं प्रदत्तम्, येषु महिला: बाला: च समेत्य बहवः जनाः मृत्युमुपगताः। असौ प्रोक्तवान् यत्, भारतं निर्दोषाणां नागरिकाणां उपरि यत्किमपि आक्रमणं भवति तस्य निर्विवादरूपेण निन्दां करोति।

## अमेरिकी काङ्ग्रेस - ट्रम्प:

अमेरिकी काङ्ग्रेसदलेन रिपब्लिकनदलस्य नवनिर्वाचितस्य राष्ट्रपतेः डोनाल्डट्रम्प इत्यस्य नवम्बरमासस्य निर्वाचने विजयस्य औपचारिकरूपेण प्रमाणीकरणं कृतम्, येन जनवरीमासस्य विंशतिः दिनाङ्के शपथग्रहणस्य मार्गः स्पष्ट: जात:।

## छत्तीसगढ़:

छत्तीसग□स्य बीजापुर-जनपदे ह्य: माओवादिभि: सुरक्षाबलस्य एकं वाहनं नष्टीकृतम्, यस्मिन् वाहनचालक: अष्टसैनिका: च दिवङ्गता:। इयं घटना बस्तर-सम्भागस्य कुटरू-आरक्षिस्थानकस्य अन्तर्गतस्य अम्बेली-नगरस्य समीपे जाता।

## ऋतुविभाग:

भारतऋतुविभागेन उत्तरप्रदेशस्य, पञ्जाबस्य, चण्डीग□स्य, ओडिशायाः, बिहारस्य च केषुचित् भागेषु आगामिदिनद्वये रात्रौ प्रातः च अत्यन्तं सघननिहारस्य पूर्वानुमानं कृतम् अस्ति। देशस्य उत्तरप्रदेशे सघननीहारस्य कारणेन नैकानि रेलयानानि, विमानानि च प्रभावितानि जातानि।

## बीसीसीआई-महिलाक्रिकेट

भारत क्रिकेट् नियन्त्रणमण्डलेन बीसीसीआई इत्यनेन आयरलैण्डविरुद्धं भारतस्य आगामितिसृणां एकदिवसीयक्रीडाश्रृङ्खलायाः कृते पञ्चदश सदस्यात्मिकायाः महिलादलस्य घोषणा कृता। दल प्रमुख: हरमनप्रीत कौर: रेणुका सिंह ठाकुर: च श्रृङ्खलायाः कृते विश्रामं प्राप्तवन्तौ। स्मृति मान्धना भारतीय महिलादलस्य नेतृत्वं करिष्यति, दीप्तिशर्मा उपनायिका भविष्यति।